अग्निभीतिर्वहुकन्या धनसम्मानकोपदम् ।
राजन्नं कोपदं पूर्व्वे फलतो द्वारमीरितम् ।
ईशानादौ भवेत् पूर्व्वे आग्नेयादौ तु दक्षिणे ॥
नैरृत्यादौ पश्चिमे स्यात् वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणाञ्च फलाफलम् ॥
अश्वत्थप्लक्षन्यग्रोधाः पूर्व्वादौ स्यादुडुम्बरः ।
गृहस्य शोभनः प्रोक्त ईशाने चैव शाल्मलिः ॥
पूजितो विघ्नहारी स्यात् प्रासादस्य गृहस्य
च ।”
इत्यादि गारुड़े वास्तुमानलक्षणं ४६ अध्यायः ॥
प्रासादलक्षणन्तु प्रासादशब्दे द्रष्टव्यम् ॥ * ॥
अपि च ।

ऋषय ऊचुः ।

“प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ॥

सूत उवाच ।

भृगुरत्रिर्व्वशिष्ठश्च विश्वकर्म्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ॥
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ॥
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ॥
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् समुद्भूतं समुल्वणम् ॥
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिवत् पतितं क्षितौ ॥
तेन तत्समरे सर्व्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमत्तद्भूतं न तदा यदा ॥
तदा शिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतां त्रयम् ॥
ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ॥
तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्तश्च शूलिना ॥
ततस्तत् त्रिदिवं सर्व्वं भूमण्डलमशेषतः ।
स्वदेहेनान्तरीयञ्च सन्धानं प्रापतद्भुवि ॥
भीतभीतैस्ततो देवैर्ब्रह्मणा वाथ शूलिना ।
दानवासुररक्षोभिरवष्टब्धं समन्ततः ॥
येन यत्रैव चाक्रान्तं स तत्रैवाभवत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ॥
अवष्टब्धेन तेनापि विज्ञप्ताः सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वे युष्माभिर्निश्चलीकृतः ॥
स्थास्यामि किं यदाहारमवष्टब्धमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥
आहारो वैश्वदेवान्ते न्यूनमस्मिन् भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ॥
एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति शान्तये ॥”
इति मात्स्ये वास्तुभूतोद्भवो नाम २२६ अध्यायः ॥ * ॥

सूत उवाच ।

“अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभञ्च हानिं भाद्रपदे तथा ॥
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धन-
धान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
लाभञ्च बहुशो विन्द्यादग्निं माघे विनिर्द्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ॥
विष्क भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेते मैत्रेय माहेन्द्रे गान्धर्व्वेऽभिजिद्रौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत् ॥
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ॥
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु शस्यते ॥
रत्निमात्रे तु वै गर्त्तेष्वनुलिप्ते तु सर्व्वतः ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेत् भूपरीक्षार्थं पूर्व्वं तत् सर्व्वदिङ्मुखम् ॥
दीप्तौ पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः सार्व्वहिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके श्रियमाप्नोति न्यूने हानिः समे समम् ।
हलकृष्टेऽथवा देशे सर्व्वबीजानि वापयेत् ॥
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्व्वर्ज्जनीयतरा मता ॥
पञ्चगव्योषधिजलैः परीक्षित्वा च सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पश्चात् पिष्टेन चालिप्येत् सूत्रेणालोच्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत् पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिषु तान् पूजयेद्धविषा नरः ।
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्यथा ।
आपश्चैवाथ सावित्रो जयो भद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
साध्या नैकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः
शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः ॥
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्ते तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥ * ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः ॥
मुख्याद्भृशमथो शेषात् वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् भृगोः पर्ज्जन्यमेव च ॥
एते वंशाः समाख्याताः क्वचिद्दुर्ज्जय एव च ।
एतेषां यस्तु सम्पातः पदं मध्यं समन्ततः ॥
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासे तु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्जयेद्यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवैश्वानरायतः ॥
मूर्द्धन्यग्निः समादिष्टो मुखे चापः समाहितः ।
पृथ्वीधरोऽर्य्यमा चैव तयोस्तावदधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रेऽदितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सत्यरोगादयस्तद्बाह्वोः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ ।
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने ॥
तथैवासुरशोषौ च वामपार्श्वे समास्थितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
ऊर्व्वोर्य्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्द्धपदास्ततः ॥
बहिष्कोणे तु चाष्टौ तु सार्द्धाश्चोभयसंस्थिताः ।
विंशतिर्द्विपदाश्चैषां चतुःषष्टिपदे स्मृताः ॥ * ॥
गृहारम्भे तु कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यन्त्वपनयेत्तत्र प्रासादे भवनेऽपि वा ॥
सशल्यं भयदं तस्मादशल्यं शुभदायकम् ।
हीनाधिकाङ्गभावांस्तु सर्व्वथा तु विवर्ज्जयेत् ॥
नगरग्रामदेशेषु सर्व्वत्रैवं प्रकल्पयेत् ।